# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - मार्च्-एप्रिल् २०१९

**कक्षा**-शास्त्री-२ (SEM-4) **प्रश्नपत्रम्** - ७ **गुणाः** - ७०

**विषयः** - वास्तुशास्त्रम् **कोड- CE- 244** **समयः** - ३ तः ६

**दिनाङ्कः** - ५/०४/२०१९ **सन्दर्भग्रन्थः**- (१) वास्तुराजवल्लभः (२) अहिबलचक्रम्

---

॥ **प्रथमान्वितिः** ॥ (Unit-1)

**प्रश्नः १ अधोलिखितेषु त्रिषु कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत ।** १०

१ विप्रे सप्तकरा च भूपसदने षट् पञ्च वैश्ये तथा
कुर्याद् हस्तचतुष्टयं च वृषले त्रिद्वयेकतो हीनके ।
तस्योर्ध्वे च नरेश्वरासनमतो माण्डं चतुःस्तम्भको
हेम्ना मौक्तिकपट्टकूलमणिभिः सौम्यायने राजितम् ॥

२ त्रिशालं गृहं दिक्त्रये ह्रस्वयुग्मं मुखे वीथिकाग्रे च षड्दारु मध्यम् ।
गुणालिन्दचातुर्दिशं चैकवक्त्रं गवाक्षं च कोणे च भद्रं विधेयम् ॥

३ उत्तानपट्टो नृपमन्दिरे स्यात् हस्ते च हस्ते द्वियवोन्नतोऽसौ ।
पाषाणतः सौख्यकरो नृपाणां धनक्षयं सोऽपि करोति गेहे ॥

**प्रश्नः २ खातादिधनफलानयनं ग्रन्थाधारेण विशदं वर्णयत ।** १०

अथवा

**गृहप्रदेशमुहूर्तं ग्रन्थाधारेण दर्शयत ।**

॥ **द्वितीयान्वितिः** ॥ (Unit-2)

**प्रश्नः ३ अधोलिखितेषु त्रिषु कयोश्चिद् द्वयोः सान्वयं व्याख्यां कुरुत ।** १०

१ षष्ठे शिशोः पञ्चमके कुमार्या मासेऽन्नसम्प्रासनमुत्तरासु ।
श्रुत्यश्विनीवासवहस्तपुष्ये चित्रामृगादित्यविधातृपौष्णे ॥

२ गजाश्वकर्माणि करत्रये च पुनर्वसौ पुष्यमृगाश्विपौष्णे ।
श्रुतित्रयेष्वेन तथापि मैत्रे ह्यत्रैव भैषज्यविधिः समूले ॥

३ तैलाङ्गारकचाश्मभस्मफणिनः कार्पासलोहाजिनं
तक्रावस्करकृष्णधान्यलवणं काष्ठास्थिविष्टावसाः ।
पण्याकस्तुषरज्जुशृङ्खलगुडं पङ्को घटो रिक्तको
नासाहीनविनग्नमुण्डिवमनप्रव्राजकं बह्निकाः (वंजाधका?)

**प्रश्नः ४ ज्योतिषलक्षणाध्यायस्य सारांशं लिखत ।** १०

अथवा

**दुर्गाशकुनविचारः ग्रन्थाधारेण प्रस्तूयताम् ।**

॥ **तृतीयान्वितिः** ॥ (Unit-3)

**प्रश्नः ५ अधोलिखितेषु त्रिषु कयोश्चिद् द्वयोः ससन्दर्भं व्याख्यां कुरुत ।** १०

१ ऊर्ध्वं रेखाष्टकं लेख्यं तिर्यक्पञ्च तथैव च । अहिवक्त्रं भवत्येवमष्टाविंशतिकोष्ठकम् ॥

२ षष्ठिघ्नं तं निशानाथं शरवेदाप्तकं पुनः । त्रिभिर्भक्त्वा युगैः शेषं प्रागादिचक्रवक्त्रगम् ॥

३ अधिष्ठितं भवेद् द्रव्यं यत्र चन्द्रो ग्रहान्वितः । तदधिष्ठापको ज्ञेयो भास्करादिग्रहैः क्रमात् ॥

**प्रश्नः ६ अहिबलचक्रे चन्द्रमाफलं सविस्तरं दर्शयत । १०**

अथवा

**अहिबलचक्रे नक्षत्रस्थापनविचारं स्पष्टयत ।**

**प्रश्नः ७ दशप्रश्नानाम् अतिलघूत्तराणि यच्छत । १०**

१ श्रीपर्णीवृक्षः शयननिर्माणे प्रयुज्यते न वा?

२ सुयशः सिंहासने गजरथस्य रचना भवति न वा?

३ सभाप्रकाराः कति?

४ राजगृहे वेदिकामानं किम्?

५ राजप्रासादस्य कस्मिन् भागे अश्वशालायाः स्थापना करणीया?

६ गजशालायाः निर्माणं राजप्रासादस्य कस्मिन् भागे करणीयम्?

७ सेनापतिगृहस्य उत्तममानं किम्?

८ शुभक्षेत्रगते चन्द्रे को लाभः भवति?

९ अहिबलचक्रं कस्मिन् कार्ये प्रयुज्यते?

१० नन्दासंज्ञकतिथयः काः?

११ त्रयोदशी-शुक्रवासरे सिद्धयोगः भवति न वा?

१२ रविवासरे वास्तुकर्म कर्तुं शक्यते न वा?

१३ गृहप्रवेशः कस्मिन् पक्षे करणीयः?

१४ राजवल्लभग्रन्थस्य त्रयोदशाध्यायस्य नाम किम्?

१५ ऊर्ध्वमुखनक्षत्राणि कानि?

०००